# ॥ अद्वैतभावनोपनिषत् ॥
# || advaitabhāvanopaniṣat ||

**Informazioni:**
Titolo: Advaitabhavano Upanishad
Nome file: advaitabhavano_upanishad
Categoria: Upanishhad
Locazione: http://www.culturavedica.org
Autore: Tradizione vedica
Linguaggio: Sanscrito
Soggetto: Filosofia/Religione/Induismo
Translitterazione: http://www.culturavedica.org
Correzione: http://www.culturavedica.org
Ultima revisione: 10 maggio 2018
Accesso:http://www.culturavedica.org/pdf/advaitabhavano_upanishad
Mail: info@culturavedica.org
Font: Sanskrit 2003
Testo editabile disponibile: info@culturavedica.org

**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica", può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

Aiutate a mantenere il rispetto e lo spirito del sito.

# ॥ अद्वैतभावनोपनिषत् ॥ || advaitabhāvanopaniṣat ||

| | |
|---|---|
| अद्वैतभावनां वक्ष्ये श्रृणुष्व कमलानने। | advaitabhāvanāṃ vakṣye śṛṇuṣva kamalānane\| |
| यस्य विज्ञानमात्रेण भवेद्गङ्गाधरः स्वयम्॥ | yasya vijñānamātreṇa bhavedgaṅgādharaḥ svayam\|\| |
| अहं स्त्री । | ahaṃ strī \| |
| पुरुषोऽहम् । | puruṣo:ham \| |
| सदाशिवोऽहम् । | sadāśivo:'ham \| |
| परमप्रकृत्योऽहम् । | paramaprakṛtyo:ham \| |
| परमप्रकृतिरहम् । | paramaprakṛtiraham \| |
| परमपुरुषोऽहम् । | paramapuruṣo:ham \| |
| नादोऽहम् । | nādo:ham \| |
| बिन्दुरहम् । | binduraham \| |
| कलाश्चाहम् । | kalāścāham \| |
| शब्दब्रह्माहम् । | śabdabrahmāham \| |
| क्रियायागोऽहम् । | kriyāyāgo:ham \| |
| ब्रह्माहम् । | brahmāham \| |
| विष्णुरहम् । | viṣṇuraham \| |
| सौरोऽहम् । | sauro:ham \| |
| ब्राह्मोऽहम् । | brāhmo:ham \| |
| वैष्णवोऽहम् । | vaiṣṇavo:ham \| |
| शिवाऽहम् । | śivā:'ham \| |
| नानाशक्त्यहम् । | nānāśaktyaham \| |
| असुरोऽहम् । | asuro:ham \| |
| सुरोऽहम् । | suro:'ham \| |
| उच्चाररहितोऽहम् । | uccārarahito:ham \| |
| विद्याऽहम् । | vidyā:ham \| |
| वेदाश्चाहम् । | vedāścāham \| |
| वेदशाखिनश्चाहम् । | vedaśākhinaścāham \| |
| वेदक्रियाऽहम् । | vedakriyā:ham \| |
| वेदसाक्षिणश्चाहम् कर्मयोगोऽहम् । | vedasākṣiṇaścāham karmayogo:ham \| |
| धर्मकर्मोऽहम् । | dharmakarmo:ham \| |
| पिताऽहम् । | pitā:ham \| |
| माताऽहम् । | mātā:ham \| |
| पुत्रोऽहम् । | putro:ham \| |
| गुरुरहम् । | gururaham \| |
| आचार्योऽहम् । | ācāryo:ham \| |
| आगमोऽहम् । | āgamo:ham \| |
| रामायणोऽहम् । | rāmāyaṇo:ham \| |
| महाभागवतोऽहम्। | mahābhāgavato:ham\| |
| महाभारतोऽहम् । | mahābhārato:ham \| |
| श्रीभागवतोऽहम् । | śrībhāgavato:ham \| |
| श्रुतिशास्त्राण्यहम् । | śrutiśāstrāṇyaham \| |
| मन्त्रोऽहम् । | mantro:ham \| |
| मन्त्रार्थोऽहम् । | mantrārtho:ham \| |
| स्तवोऽहम् । | stavo:ham \| |
| कवचोऽहम् । | kavaco:ham \| |
| अहं सहस्रनामानि । | ahaṃ sahasranāmāni \| |
| अहं गायत्री । | ahaṃ gāyatrī \| |
| बीजान्यहम् । | bījānyaham \| |
| कूटाक्षरोऽहम् । | kūṭākṣaro:ham \| |
| त्र्यक्षोऽहम् । | tryakṣro:ham \| |
| पञ्चाशन्मातृकाऽहम् । | pañcāśanmātṛkā:ham \| |
| पञ्चभूतान्यहम् । | pañcabhūtānyaham \| |
| पञ्चमहाभूतान्यहम् । | pañcamahābhūtānyaham \| |
| तत्त्वान्यहम् । | tattvānyaham \| |

CULTURA VEDICA

| | |
|---|---|
| स्थूलोऽहम् । | sthūlo:ham \| |
| सूक्ष्मोऽहम् । | sūkṣmo:ham \| |
| कुलाकुलाश्चाऽहम् । | kulākulāścā:ham \| |
| कुलाचलश्चाऽहम् । | kulācalaścā:ham \| |
| प्रमाणादि षोडशपदार्थोऽहम् । | pramāṇādi ṣoḍaśapadārtho:ham \| |
| ऋषयश्चाऽहम् । | ṛṣayaścā:ham \| |
| मुनयश्चाऽहम् । | munayaścā:ham \| |
| लक्ष्मीरहम् । | lakṣmīraham \| |
| स्त्रियोऽहम् । | striyo:ham \| |
| श्रियोऽहम् । | śriyo:ham \| |
| प्रियोऽहम् । | priyo:ham \| |
| गौर्यहम् । | gauryaham \| |
| भूतोऽहम् । | bhūto:ham \| |
| कुष्माण्डोऽहम् । | kuṣmāṇḍo:ham \| |
| प्रेतोऽहम् । | preto:ham \| |
| लोकपालाश्चाऽहम् । | lokapālāścā:ham \| |
| ग्रहाश्चाऽहम् । | grahāścā:ham \| |
| दिग्गजाश्चाऽहम् । | diggajāścā:ham \| |
| दशदिशोऽहम् । | daśadiśo:ham \| |
| ऊर्ध्वोऽहम् । | ūrdhvo:ham \| |
| अधोऽहम् । | adho:ham \| |
| चतुर्दशभुवनान्यहम् । | caturdaśabhuvanānyaham \| |
| तत्स्थोऽहम् । | tatstho:ham \| |
| तदसम्प्रदर्च्चाश्रद्धानन्तरम् । | tadasampradarccāśraddhānantaram \| |
| तदहं सम्प्रकुर्यात् । | tadahaṃ samprakuryāt \| |
| जपेन्मन्त्रं विधानेन सङ्ख्यां कुर्वन् विधानतः । | japenmantraṃ vidhānena saṅkhyāṃ kurvan vidhānataḥ \| |
| न दोषो मानसे जापे इत्याह भगवान् शिवः ॥ | na doṣo mānase jāpe ityāha bhagavān śivaḥ \|\| |
| इति सदाशिवप्रणीतं अद्वैतभावं समाप्तम् । | iti sadāśivapraṇītaṃ advaitabhāvaṃ samāptam \| |

CULTURA VEDICA